# shrI shani aShTottarashatanAma stotram

# શ્રીશનિ અષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : Shani Ashtottarashatanama Stotram

File name : shani108nAmastotra.itx

Category : aShTottarashatanAma, navagraha, stotra

Location : doc_z_misc_navagraha

Transliterated by : Manda Krishna Srikanth

Proofread by : KSR Ramachandran

Latest update : March 31, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 31, 2024

*sanskritdocuments.org*

# શ્રીશનિ અષ્ટોત્તરશતનામસ્તોત્રમ્

શનિ બીજ મન્ત્ર - ૐ પ્રાઁ પ્રીં પ્રૌં સઃ શનૈશ્ચરાય નમઃ ॥

શનૈશ્ચરાય શાન્તાય સર્વાભીષ્ટપ્રદાયિને ।
શરણ્યાય વરેણ્યાય સર્વેશાય નમો નમઃ ॥ ૧॥

સૌમ્યાય સુરવન્દ્યાય સુરલોકવિહારિણે ।
સુખાસનોપવિષ્ટાય સુન્દરાય નમો નમઃ ॥ ૨॥

ઘનાય ઘનરૂપાય ઘનાભરણધારિણે ।
ઘનસારવિલેપાય ખદ્યોતાય નમો નમઃ ॥ ૩॥

મન્દાય મન્દચેષ્ટાય મહનીયગુણાત્મને ।
મર્ત્યપાવનપાદાય મહેશાય નમો નમઃ ॥ ૪॥

છાયાપુત્રાય શર્વાય શરતૂણીરધારિણે ।
ચરસ્થિરસ્વભાવાય ચઞ્ચલાય નમો નમઃ ॥ ૫॥

નીલવર્ણાય નિત્યાય નીલાઞ્જનનિભાય ચ ।
નીલામ્બરવિભૂષાય નિશ્ચલાય નમો નમઃ ॥ ૬॥

વેદ્યાય વિધિરૂપાય વિરોધાધારભૂમયે ।
ભેદાસ્પદસ્વભાવાય વજ્રદેહાય તે નમઃ ॥ ૭॥

વૈરાગ્યદાય વીરાય વીતરોગભયાય ચ ।
વિપત્પરમ્પરેશાય વિશ્વવન્દ્યાય તે નમઃ ॥ ૮॥

ગૃધ્નવાહાય ગૂઢાય કૂર્માંગાય કુરૂપિણે ।
કુત્સિતાય ગુણાઢ્યાય ગોચરાય નમો નમઃ ॥ ૯॥

અવિદ્યામૂલનાશાય વિદ્યાઽવિદ્યાસ્વરૂપિણે ।
આયુષ્યકારણાયાઽપદુદ્ધર્ત્રે ચ નમો નમઃ ॥ ૧૦॥

વિષ્ણુભક્તાય વશિને વિવિધાગમવેદિને ।

વિધિસ્તુત્યાય વન્દ્યાય વિરૂપાક્ષાય તે નમઃ ॥ ૧૧॥

વરિષ્ઠાય ગરિષ્ઠાય વજ્રાંકુશધરાય ચ ।
વરદાભયહસ્તાય વામનાય નમો નમઃ ॥ ૧૨॥

જ્યેષ્ઠાપત્નીસમેતાય શ્રેષ્ઠાય મિતભાષિણે ।
કષ્ટૌઘનાશકર્યાય પુષ્ટિદાય નમો નમઃ ॥ ૧૩॥

સ્તુત્યાય સ્તોત્રગમ્યાય ભક્તિવશ્યાય ભાનવે ।
ભાનુપુત્રાય ભવ્યાય પાવનાય નમો નમઃ ॥ ૧૪॥

ધનુર્મણ્ડલસંસ્થાય ધનદાય ધનુષ્મતે ।
તનુપ્રકાશદેહાય તામસાય નમો નમઃ ॥ ૧૫॥

અશેષજનવન્દ્યાય વિશેષફલદાયિને ।
વશીકૃતજનેશાય પશૂનામ્પતયે નમઃ ॥ ૧૬॥

ખેચરાય ખગેશાય ઘનનીલામ્બરાય ચ ।
કાઠિન્યમાનસાયાઽર્યગણસ્તુત્યાય તે નમઃ ॥ ૧૭॥

નીલચ્છત્રાય નિત્યાય નિર્ગુણાય ગુણાત્મને ।
નિરામયાય નિન્દ્યાય વન્દનીયાય તે નમઃ ॥ ૧૮॥

ધીરાય દિવ્યદેહાય દીનાર્તિહરણાય ચ ।
દૈન્યનાશકરાયાઽર્યજનગણ્યાય તે નમઃ ॥ ૧૯॥

ક્રૂરાય ક્રૂરચેષ્ટાય કામક્રોધકરાય ચ ।
કળત્રપુત્રશત્રુત્વકારણાય નમો નમઃ ॥ ૨૦॥

પરિપોષિતભક્તાય પરભીતિહરાય ચ ।
ભક્તસંઘમનોઽભીષ્ટફલદાય નમો નમઃ ॥ ૨૧॥

ઇત્થં શનૈશ્ચરાયેદં નાંનામષ્ટોત્તરં શતમ્ ।
પ્રત્યહં પ્રજપન્મર્ત્યો દીર્ઘમાયુરવાપ્નુયાત્ ॥

ઇતિ શ્રીશનિ અષ્ટોત્તરશતનામસ્તોત્રં સમ્પૂર્ણમ્ ।

Provided by Manda Krishna Srikanth
Proofread by KSR Ramachandran

*shrI shani aShTottarashatanAma stotram*

pdf was typeset on March 31, 2024

Please send corrections to *sanskrit@cheerful.com*